# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा – -२०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य-१** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – स्वामिनारायणवेदान्तः(J)** | **सत्रम् – २** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – ईशकेनप्रश्नोपनिषदः** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**

**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ कयोश्चित् द्वयोः यथाभाष्यं व्याख्यानं कुरुत।**

१ ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।

२ हिरण्मयपात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।

३ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं च उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।।

४ यस्यामतं तस्य मतं मतं यस्य न वेद सः।
अविज्ञातं विजानतां विज्ञातम् अविजानताम्।।

**प्रश्नः २ शुक्लयजुर्वेदस्य शान्तिमन्त्रः व्याख्येयः।**

**प्रश्नः ३ ईशशब्दस्य रुद्रपरत्वं निरसत।**

**प्रश्नः ४ केनोपनिषदः शान्तिमन्त्रः विवेचनीयः।**

**प्रश्नः ५ केनोपनिषदः प्रथमखण्डस्य सारः लेख्यः।**

**प्रश्नः ६ द्वावेव भाष्यानुगुणौ व्याख्येयौ।**

१ तस्मै तृणं निदधौ, तदुपप्रेयाय सर्वजवेन, तन्न शशाक दग्धुम्।
स तत एव निववृते, नैतदशकं विज्ञातुम्, यदेतद्यक्षमिति।।

२ तस्यै तपो दमः कर्मेति प्रतिष्ठा।
वेदाः सर्वाङ्गानि सत्यमायतनम्।।

३ अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्।
ऋचो यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च।।

४ तेषामसौ विरजो ब्रह्मलोकः,
न येषु जिह्ममनृतं न माया चेति।

**प्रश्नः ७ देवासुरसङ्ग्रामस्य हार्दं स्पष्टयत।**

**प्रश्नः ८ केनोपनिषदः सारः लेख्यः।**

**प्रश्नः ९ प्रश्नोपनिषदः शान्तिमन्त्रः व्याख्येयः।**

**प्रश्नः१० प्रश्नोपनिषदः पञ्चमप्रश्नस्य सारः उपपादनीयः।**

**प्रश्नः११ अधोलिखितेषु दशानाम् एव एकवाक्येन उत्तराणि लेख्यानि।**

१ श्रीमता गोपालानन्दस्वामिना उपनिषत्सु का टीका रचिता?

२ ईशावास्योपनिषदः नाम्नः औचित्यं ब्रूत?

३ केनोपनिषदि कयोः सङ्ग्रामः?

४ ईशावास्ये सुबोधिन्याः मङ्गलं किम्?

५ किन्नाम वनम्?

६ ईशावास्यं कं वेदमनुसरति?

७ केनोपनिषदि कस्मात् वेदात् उपात्ता??

८ कीदृशानि कर्माणि करणीयानि?

९ के अन्धं तमः प्रविशन्ति?

१० ईशः इत्यस्य शब्दस्य कः अभिप्रायः?

११ प्रश्नोपनिषदि कति ऋषिकुमाराः?

१२ प्रश्नोपनिषदि आचार्यः कः?

१३ गुरूपसरणं कथं कर्तव्यम्?

१४ कः श्रोत्रियः?

१५ प्राणे किं प्रतिष्ठितम्?

***